National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(54): 224-227
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. मोरा श्रीधरः**
संस्कृतिविभागः,
उस्मानिया विश्वविद्यालयः,
हेदराबाद

**Correspondence:**
**डॉ. मोरा श्रीधरः**
संस्कृतिविभागः,
उस्मानिया विश्वविद्यालयः,
हेदराबाद

# रामायणे ज्ञानमूर्तयो महिलाः

**डॉ. मोरा श्रीधरः**

**अवतारिका –** विश्वश्रेयः साहित्यस्य परमलक्ष्यं भवति। संस्कृतसाहित्येन विश्वश्रेयो जायते।[1] प्रपञ्चे अतिप्राचीनलिखितसाहित्येषु संस्कृतसाहित्यमग्रगण्यं भवति।[2] देशस्य संस्कृतिः सौभाग्यं च देशभाषासाहित्ये प्रतिबिम्बिते भवतः। भारतदेशसंस्कृतिः संस्कृतसाहित्ये प्रतिबिम्बितं भवति। ऋग्वेदादाश्ब्धा संस्कृतसाहित्यसृष्टिः अद्यतनपर्यन्तं निरन्तरं प्रचलति। एतादृशा निरन्तरसृष्टिः अन्यभाषासाहित्येषु न दृश्यते।[3] तादृशसंस्कृतसाहित्ये आदिकाव्यं रामायणम्।[4]

**रामायणम् –** रामायणमाहात्म्यमजानन् भारतीयो नास्ति। आदिकाव्यमिदं रामायणं आदिकविना वाल्मीकिमहार्षिणा प्रणीतम् । तस्मात् विश्वेऽस्मिन् कवीनामयमादिमहाकविः महर्षिवाल्मीकिः परमो गुरुरिति निश्चप्रचं वक्तुं शक्यते।[5] रामायणे आर्यसंस्कृतेः अनुपममादर्शस्वरूपमुपलभ्यते। आर्यावर्तस्य तदानीन्तनं चित्रं मानचित्रं चेतश्चक्षुर्विषयीक्रियते, यदेयमार्यजातिः समुन्नतिशैलस्य सर्वोत्तुङ्गं श्रृङ्गं समाधिरुढमासीत्।[6] इदानीं बहूनि विमानानि विलोक्यन्ते, परन्तु पुरातनस्यैकस्यापि पुष्पकस्य तुलां न कानिचिदारोढुं शक्ष्यन्ति। विविधविधविषयविलसितं प्रामाण्ये श्रुतिशास्त्रसम्मितम् उपदेशे तु कान्तासम्मितं नैकविधकाव्यगतचमत्कारचारुकलेबरम् आत्मभूतरसध्वनि-समन्वितम् इदं महाकाव्यं आत्मनः तुलनां न रक्षति क्वापि त्रैलोक्यामपि ।[7]

रामायणे चतुर्विंशतिसहस्रसंख्याकाः (24,000) श्लोकाः सन्ति।[8] घातुकप्रवृत्तिविनाशाय सर्वे सामायणे विद्यमानं तत्त्वं सम्यक् जानीयुः।[9] व्यक्तित्वविकासं, आशावादम् इत्यादीनधुना आवश्यकान् विषयान् रामायणं सुलभशैल्यां बोधयतीति पाश्चात्यदेशीयैस्सह सर्वैरङ्गीकृतम् ।[10]

**ज्ञानम् –** 'मनुष्यः इन्द्रियैः अतीतशक्त्या च यद्यत् जानाति तत्सर्वं साधारणज्ञानमेव। वेदाः अपि साधारणज्ञानमेव।' इति मुण्डकोपनिषद् वदति। 'मनुष्यः स्वमेधामुपयुज्यापि यस्य एकमंशमपि सम्यगवगन्तुं न प्रभवति तस्य लोकस्य कश्चन स्रष्टाऽस्ति। तं स्रष्टारं भगवन्तं ज्ञातुं यद् ज्ञानमस्ति तदेव उन्नतज्ञानम् इत्युच्यते। तदुन्नतज्ञानमेव समस्तज्ञानानां मूलं भवति।' इति मुण्डकोपनिषदि प्रोक्तम्।[11]

आध्यात्मिकज्ञानं समस्तज्ञानानामाधारभूतं भवति। आत्मसम्बद्धं ज्ञानम् आध्यात्मिकज्ञानमित् कथ्यते। अङ्गिरसः शौनकं प्रति कथितवचनमनुसृत्य ज्ञानं द्विविधम् उत्कृष्टं, सामान्यं चेति। एतद्विविधं ज्ञानं ज्ञेयमेव ।[12]

ऋग्वेदः, यजुर्वेदः, अथर्ववेदः, सामवेदः, शब्दशास्त्रं, व्याकरणं, निघण्टुः, धन्दः, खगोलशास्त्रं, ज्योतिषं इत्यादिविषयाः सामान्यज्ञानेऽन्तर्भवन्ति। अविनाशी भगवान् येन ज्ञानेन ज्ञातो भवति तदेव अत्युन्नतज्ञानं भवति।[13] 'येन ज्ञानेन वयं भगवत्प्राप्तिं लभेम तदेवात्युन्नतज्ञानं भवति' इति मुण्डकोपनिदुपदिशति।[14]

यस्य कर्माणि सर्वाणि ज्ञानग्निना दह्यन्ते तं पण्डितः इति वदन्तीति भगवद्गीता बोधयति । अनेन ज्ञानवानेव पण्डितो भवतीति ज्ञायते।

**'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।**

**ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।।'**[15]

(भगवद्गीता-4-अ-19-श्लो)

रामायणे पूर्वोक्तद्विविधं ज्ञानं दृश्यते। रामायणे महिलाः बह्व्यः ज्ञानमूर्तयो दृश्यन्ते ।

**महिलाः -** मह्यते इति महिला इति महिलाशब्दस्य व्युत्पत्त्यर्थः।[16] स्त्री - वनिता – अबला इत्यादीनि महिलाशब्दस्य पर्यायपदाति सर्वाणि महिलानां माहात्म्यं प्रकटयन्ति। महिलानां माहात्म्यं वेदपुराणेतिहासधर्मशास्त्रादि सकलसंस्कृतसाहित्ये सम्यक् प्रतिपादितम्। महिलाः लोकस्य आधारभूताः इति पुराणानि वदन्ति।[17] महिलानां पूजया देवताः प्रीताः भवन्तिः' इति मनुस्मृतिर्वदति ।

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।'**[18]

(मनुस्मृतिः-3-56)

'यथा सागरः नदीः पालयति तथा महिला गृहस्य महराज्ञी भूत्वा कुटुम्बं पालयति' इति वेदः महिलामाहात्म्यं वदति।[19]

'यथा भार्या भर्तारं हितकारिणं मनुते तथैव भर्तापि पत्नीं हितकारिणीमिति भावयेत्' इति वेदे महिलामाहात्म्यं प्रोक्तम्।[20]

'पतिः पत्नी च द्वावपि दैवानुग्रहेण ऐश्वर्योपेतौ भूत्वा राजाराज्ञी चेव गृहकार्याणि कुर्यास्ताम् । पुत्रपौत्रादिभ्यस्तौ उत्तमशिक्षां ददन्तौ सदा आनन्दमनुभवेताम्' इति वेदाः बोधयन्ति ।

**'इयमग्नेनारीपितं विदेष्टसोमो हि राजा सुभगां कृणोति ।**

**सुवानापुत्रान् महिषी भवातिगत्वा पतिं सुभगा वि राजतु।।'**

(अर्थववेदः – खण्डः-2, सूक्तम्-36,मन्त्रः-3)

**'इह प्रियं प्रजया ते समृद्ध्यतामस्मिन् गृहे गार्हपत्यायजा गृहि ।**

**एनापत्यातन्वं संसृजस्वाऽद्या जिव्री विदधमावधासि।।'**[21]

(ऋग्वेदः10-85-27)

एवं महिलाः ज्ञानहेतोः प्रशंस्यन्ते। महिला मातृभगिनीमित्र-पत्न्यादिपात्राणि पोषयित्वा स्वजीवनं सार्थक्यं करोति।

**रामायणे ज्ञानमूर्तयो महिलाः –** रामायणे नैकानि स्त्रीपात्रिण सन्ति । तेषु बहूनि स्त्रीपात्राणि ज्ञानपूरितान्येव। दृष्टान्तार्थं कानिचन पात्राणि अत्र पश्यामः –

**कौसल्या** – प्रायो जनाः समानत्वमेवाभिलषन्ति। समानतां न प्रकटयन्ति चेत् कुपिताः भवन्ति। परन्तु रामायणे कौसल्या सुमित्रा कैकेयी च ज्ञानहेतोः असमानतां प्राप्यापि कुपिताः नासन्। सन्तानार्थं दशरथः ताभ्यः पायसं असमानतया भागान् कृत्वाऽदात्। तदा ताः कुपिताः नाभवन्। अनेन ताः ज्ञानमूर्तयः इति ज्ञायते ।

**'ताश्चैवं पायसं प्राप्य नरेन्द्रस्योत्तमस्त्रियः ।**

**सम्मानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ।।'**[22]

(रामायणम्-बालकाण्डः-17-30)

यदा श्रीरामः आत्मनः यौवराज्यपट्टाभिषेकविषयमवदत् तदा कौसल्या तुतोष।

**'एतत्छ्रुत्वा तु कौसल्या चिरकालाभिकांक्षितम् ।'**[23]

(रामायणम्-अयोध्यकाण्डः-4-38)

सन्तानस्य प्रगतिं जनन्यै मुदावहः। ज्ञानमूर्तिर्जननी सन्तान्स्य प्रगतिं अभिलषेत् । अत्र कौसल्या रामस्य प्रगतिविषयं श्रुत्वा तुतोष । अतस्सा ज्ञानवतीति ज्ञायते ।

रामस्य यौवराज्यपट्टाभिषेकः स्थगितः इति विषयमाकर्ण्य कौसल्या दुःखिताऽभवत्। तद्दुःखेन प्राणत्यागादिविनाशकरकर्माणि वा अन्यदूषणादिकं वा सा नाकरोत् यतस्सा ज्ञानमूर्तिः ।

**अहल्या** – यदा पतिः पत्नीं भर्त्स्यति तदा पत्नी अज्ञानहेतोः विनाशकरकर्माणि करोति। परन्तु रामायणे अहल्या न तथा । सा पतिना शप्तापि ज्ञानकारणात् कुपिता न भूत्वा शापविमोचनपर्यन्तं निरीक्षणं कृत्वा अन्ते शुभफलमाप ।[24]

**अनसूया** – अधुना बहवो जनाः विपत्सु विद्यमानेभ्यो जनेभ्यः समुचितसूचनाः न ददति । अपि च तेभ्यः अज्ञानेन विनाशकरसूचनाः ददति । परन्तु रामायणे अनसूया मुनिपत्नी सीतां प्रति शुभकरोपदेशं कृतवती। यदा वनवासस्ये सीता अनसूयायै कैकेयीकृतं रामवन-वासकारणम् अकथयत् तदानसूया सीतायै समुचितसूचनां अदात् । वनवाससमये राममनुसरेति सा जगाद । अनेनानसूयायाः ज्ञानं ज्ञायते।

**'गम्यतामनुजानामि रामस्यानुचरी भव ।'**[25]

(रामायणम्-अयोध्याकाण्डः-119-10)

**शबरी** – महर्षयः शबरीं प्रति 'श्रीरामः अत्रागमिष्यति । तस्य दर्शनानन्तरं भवती तस्मै आतिथ्यं ददातु। ततो भवती स्वर्गं गमिष्यति' इत्यकथयन्। तन्निशम्य ज्ञानमूर्तिः शबरी रामलक्ष्मणाभ्यां निरीक्षणमकरोत् ।[26]

**मन्डोदरी** – मन्डोदरी प्रातःस्मरणीयासु पञ्च कन्यास्वन्यतमा ।

**'अहल्या द्रौपदी सीता तारा मन्डोदरी तथा।**

**पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्।।'**

इति पञ्चकन्यास्मरणेन महापातकनाशनं भवतीति प्रोक्तम्। रामायणे सुन्दरकाण्डे हनुमान् रावणभवने सीतान्वेषणं करोति स्म। तत्र रावणः अनेकसुन्दरीभिः सुखमनुभूय ताभिस्सह निद्रां करोति स्म। मन्डोदरी तु अन्यशय्यायां निष्कामुकतया निद्रां करोति स्म । अनेन ज्ञायते यत् मन्डोदरी अन्यस्त्रीभिः सह स्वपतिसुखभोगं वीक्ष्यापि जितेन्द्रिया पतिव्रता चाभूत् । तस्याः जितेन्द्रियत्वस्य कारणं तस्याः ज्ञानमेव ।

**'तासामेकान्तविन्यस्ते शयानां शयने शुभे ।**

**ददर्श रूपसम्पन्नामथ तां स कपिः स्त्रियम् ।।'**[27]

(रामायणम्-सुन्दरकाण्डः-10 सर्गः-50 श्लोकः)

रावणमरणानन्तरं मन्डोदरी रामं न दूषितवती। 'स्वपापफलेन रावणो हतः' इति सा जगाद । अनेन तस्याः ज्ञानं प्रकटितं भवति ।[28]

**त्रिजटा** – सीता अशोकवने राक्षसीभिः भर्त्सिता आसीत् । तदा त्रिजटा नाम राक्षसी तत्रागत्य ताः निवारयति स्म। ततः सीतां आश्वासितवती च । प्रायः राक्षयानां प्रवृत्तिः हिंसायुक्ता भवति। परन्तु त्रिजटा ज्ञानमूर्तिः। अत एव राक्षसीभ्यः सीतां सा अरक्षत्।[29] युद्धसमयेऽपि त्रिजटा सीतामाश्वासितवती।[30]

**सरमा** – त्रिजटेव सरमा नाम राक्षस्यपि उत्तमा आसीत्। सा ज्ञानमूर्तिः । अत एव युद्धसमये सा सीतामाश्वासितवती। एवं सा सीतायाः साहाय्यमकरोत् (31

**सीता** - सीता – ऊर्मिला – श्रुतकीर्ति – माण्डवी च विवाहानन्तरं पतिभिः रतिसुखानि रहसि अन्वभवन् । ज्ञानिनः एव कामसुखं रहसि आचरन्ति । अज्ञानिनः कामसुखानुभवं बहिः प्रदर्शयितुमिच्छन्ति। एषा कुसंस्कृतिः भारतदेशे अल्पैव, किन्तु केषुचिद्देशेषु अधिका दृश्यते।

**'रेमिरे मुदितास्सर्वाः भर्तृभिर्मुदिता रहः ।**[32]

(रामायणम्-बालकाण्डः-77-14)

सीतातुल्या ज्ञानमूर्तयोऽल्पाः दृश्यन्ते ।

श्रीरामः 'वनवासं कर्तुं गच्छामि, त्वं राजगृहे तिष्ठ' इति अवदत् । तदाकर्ण्य सीता कैकेय्यादीन् न दूषितवती, अपि च सापि वनवासं कर्तुं एच्छत् । प्रायः जनाः स्वस्य अपकारिणं दूषयन्ति । अज्ञानिनः स्नुषाः श्वसुरादीन् स्ववचोभिः प्रवर्तनया पीडयन्ति । परन्तु सीता न तथा । अनेन स्नुषायाः सीतायाः ज्ञानं प्रकटितं भवति ।

**'शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ।**
**सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु ।।'**[33]

(रामायणम्-अयोध्याकाण्डः-27-13)

यदा भिक्षायाचनवेषं धृत्वा सीतां समुपागम्य ततः रावणः स्वरूपं प्रकटीकृत्य सीतां प्रति 'भ्रष्टराज्येण रामेण ते जीवनमलम्, राक्षसराजेन मया सह जीवनं यापय, मां कामय' इत्यवदत् । तदा ज्ञानमूर्ति सीता तं रावणं भर्त्सितवती। प्रायः अज्ञानिनः भीत्या वा कामेन वा परेभ्यः वशाः भवन्ति । सीता न तथा । सा ज्ञानमूर्तिः ।

**'तेन किं भ्रष्टराज्येन रामेण गतचेतसा ।। (16)**
**रक्ष राक्षसभर्तारं कामय स्वयमागतम् ।।' (17)**

(रामायणम्-अरण्यकाण्डः-48 सर्गः)[34]

**'एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ।**
**अब्रवीत्परुषं वाक्यं रहिते राक्षसाधिपम् ।।'**

(रामायणम्-अरण्यकाण्डः-48-20)[35]

अशोकवने सीता निश्चलमनसा श्रीरामस्मरणमेव करोति स्म। परितः राक्षसीः सीतां भर्त्सयन्ति स्म । रावणोऽपि क्रूरवचनानि उक्त्वा अगच्छत् । तादृशक्लिष्टावस्थायामपि एकाकी भूत्वापि सीता पतिव्रता ज्ञानमूर्तिः श्रीरामस्मरणमेव करोति स्म । प्रायः ज्ञानिनः एव विपत्सु भगवन्तं प्रार्थयन्ते ।

**'नैषा पश्यति राक्षस्यो नेमान् पुष्पफलद्रुमान् ।**
**एकस्थहृदया नूनं राममेवानुपश्यति ।।'**[36]

(रामायणम्-सुन्दरकाण्डः-16-25)

**उपसंहारः –**

एवं रामायणे स्त्रियः बह्व्यः ज्ञानमूर्तयो दृश्यन्ते । तेषां जीवनैः अधुना जनाः बहून् सद्विषयान् शिक्षेरन् । यथा हि –

- अन्ये असमानतां वा पक्षपातबुद्धिं प्रदर्शयन्ति चेत् सुजनाः ज्ञानिनः । कलहं न सृजेत् ।
- जननीजनकौ सन्तानस्य प्रगतिं वीक्ष्य नन्देताम् ।
- पतिपत्न्योर्मध्ये कलहः न स्यात् । कलहेन वियोगं (Diverse) नेच्छेयुः ।
- अन्येभ्यः विपत्सु स्थितेभ्यः समुचितसूचनाः दद्यात् ।
- शुभफलप्राप्तये चिरकालं निरीक्षणं कुर्यात् ।
- जितेन्द्रियत्वमावश्यकम् ।
- कामसुखानुभवं बहिः न प्रदर्शयेत् ।
- स्त्रीणां पातिव्रत्यं प्रधानं भवति ।

अधुना पूर्वोक्तविषयान् यदि जनाः आचरन्ति तर्हि समाजे कलहः, भयं, घातुकप्रवृत्तिः इत्याद्याः भयावहपरिस्थितयः न दृश्यन्ते । ततः समाजे सुखशन्तिभद्रताः विराजन्ते । सर्वे सुखिनो भवन्ति ।

**आधारग्रन्थसूची**


1.Preservation and Promotion of Sanskrit and Samskruti National Seminar – 2016 August – 21st Kesav Memorial Institute of Technology – Hyderabad.

2.शिशुपालवधम्– व्याख्यात– डा.के.वि.सुन्दराचार्युलु एमेस्को बुक्स् – हैदराबाद् - 2023, ISBN :978-93-91517-78-6.

3.संस्कृतसाहित्यचरित्र – डा.मुदिगंटि गोपालरेड्डि, डा.मुदिगांटि सुजातारेड्डि पोट्टि श्रीरामुलु तेलुगु विश्वविद्यालयम् – हैदराबाद् – 2021, ISBN: 81-86073-313-7

4.शतश्लोकीरामायणम् – व्याख्यानम् – स्वामि ज्ञानदानन्द रामकृष्णमठम् - हैदराबाद् – 2023. ISBN: 978-93-83972-99-9

5.श्रीमद्वाल्मीकीयरामायणम् (मूलमात्रम्) – वाल्मीकिमहर्षिः गीताप्रेस - गोरखपुर – आठवाँ पुनर्मुद्रण, ISBN_ 81-293-0250-0

6.वाल्मीकिरामायणमु (बालकाण्डमु) – आचार्य पुल्लेल श्रीराम-चन्द्रुडु T.L.P. पब्लिशर्स – हैदराबादु – 2013

7.मुण्डकोपनिषत्तु – व्याख्यात – स्वामि ज्ञानदानन्द – रामकृष्णमठम्- हैदराबाद् - 2020, ISBN : 978-93-83142-97-2.

8.भासकालिदासनाटकाललो स्त्रीपात्रचित्रण– डा. पेण्ड्याल. सीता-भवानि पोट्टि श्रीरामुलु तेलुगु विश्वविद्यालयम् – हैदराबाद् – 2016

9.Bhagavadgita (as it is) – His Divine Grace, A.C.Bhakti Vedanta Swami Prabhupada, Bhaktivedanta Book Trust – Mumbai – 45th print – 2019, ISBN :978-93-84564-19-3.

## पदान्तसूची

[1] Preservation and Promotion of Sanskrit and Sams-Kruti - पृष्ठसंख्या-19

[2] शिशुपालवधम् - पृष्ठसंख्या- आह्वानम्

[3] संस्कृतसाहित्यचरित्र - पृष्ठसंख्या-179

[4] शतश्लोकीरामायणम् - पृष्ठसंख्या-iii

[5] श्रीमद्वाल्मीकीयरामायणम् - पृष्ठसंख्या-(किञ्चिन्निवेदनीयम्) 3

[6] तत्रैव - पृष्ठसंख्या-7

[7] तत्रैव - पृष्ठसंख्या-7

[8] वाल्मीकिरामायणमु - पृष्ठसंख्या-XV

[9] तत्रैव - पृष्ठसंख्या-IV

[10] तत्रैव - पृष्ठसंख्या-XIII

[11] मुण्डकोपनिषत्तु - पृष्ठसंख्या-5

[12] तत्रैव - पृष्ठसंख्या-6, 9

[13] तत्रैव - पृष्ठसंख्या-9

[14] तत्रैव - पृष्ठसंख्या-10

[15] BHAGAVADGITA (as it is) - पृष्ठसंख्या-216

[16] भासकालिदासनाटकाललो स्त्रीपात्रचित्रण - पृष्ठसंख्या-3

[17] तत्रैव - पृष्ठसंख्या-14

[18] तत्रैव - पृष्ठसंख्या-14

[19] तत्रैव - पृष्ठसंख्या-15

[20] तत्रैव - पृष्ठसंख्या-18

[21] तत्रैव - पृष्ठसंख्या-19

[22] श्रीमद्वाल्मीकीयरामायणम् - पृष्ठसंख्या-57

[23] तत्रैव - पृष्ठसंख्या-114

[24] श्रीमद्वाल्मीकीयरामायणम्-बालकाण्डः – 48, 49 सर्गौ - पृष्ठसंख्या-106

[25] तत्रैव – अयोध्याकाण्डः – 119 सर्गः - पृष्ठसंख्या-234

[26] तत्रैव – अरण्यकाण्डः – 74 सर्गः - पृष्ठसंख्या-305, 306

[27] तत्रैव - पृष्ठसंख्या-397

[28] तत्रैव – युद्धकाण्डः – H1 (III) सर्गः - पृष्ठसंख्या-609, 610

[29] तत्रैव – सुन्दरकाण्डः –17 सर्गः - पृष्ठसंख्या-415, 416

[30] तत्रैव – युद्धकाण्डः – 48 सर्गः - पृष्ठसंख्या-516, 517

[31] तत्रैव – युद्धकाण्डः – 33 सर्गः - पृष्ठसंख्या-500, 501

[32] तत्रैव - पृष्ठसंख्या-106

[33] तत्रैव - पृष्ठसंख्या-143

[34] तत्रैव - पृष्ठसंख्या-280

[35] तत्रैव - पृष्ठसंख्या-280

[36] तत्रैव - पृष्ठसंख्या-405